M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 511

Title: Darsha Purnamasa Hotra

511

दर्शपौर्णमासहोत्र

Darsha Paurna māsa Hotra	Title
	Author
	Editor
Sam. 1898 . Saka 1763.	Year, Vols.
	Publisher
511	Remarks

5॥

॥ ॥ अथदर्शपौर्णमासहौत्रप्रारंभः ॥ पत्रें ३६ ॥ ॥

दर्शपौ०॥ श्रीगणेशायनमः॥ ॥विहाराद्बहिःशुध्यर्थंप्राङ्मुखोवोदङ्मुखोवाबहि
राचम्यहोतरेहीत्यामंत्रितःप्रागुदगाहवनीयादवस्थायप्राङ्मुखोय
॥१॥ ज्ञोपवीत्याचम्यदक्षिणाद्वद्विहारंप्रपद्यतेपूर्वेणोत्करमपरेणप्रणी
ताइध्ममपरेणाप्रणीतेचात्वालंचात्वालवत्स्वेतत्तीर्थमित्याचक्षते॥प्र
पद्याशिहृततरेणपादेनवेदिश्रोण्योत्तरयापार्ष्णींसमांनिधायप्रप
देनबर्हिराक्रम्यसंहितौपाणीधारयन्नाकाशवत्यंगुलीहृदयसंमि
तावंकसंमितौवाद्यावापृथिव्योःसंधिमीक्षमाणएतद्धोतुस्थानमा ॥१॥
सनंक्षसर्वंत्रैवंभूतोवचनादन्यत्प्रेषितोजपति॥नमःप्रवक्त्रेनम

उपद्रष्ट्रेनमोनुख्यात्रेकइदमनुवक्ष्यतिसइदमनुवक्ष्यतिषण्मावश्वरंहस
स्पांतुद्यौश्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयश्चवाक्चसमस्थितयज्ञः
साधुच्छंदांसिप्रपद्येहमेवमां॥अमुकशर्माणंस्वंनामगृहीत्वा॥भूतेभ
विष्यतिजातेजनिष्यमाणआप्तजाभ्यपाव्यंवाचोअस्यांतिंवह॥इत्यंगु
ल्यग्राण्यवकृष्य॥जातवेदोरमयापशून्मयीतिप्रतिसंदध्यात्॥वर्मे
मेद्यावापृथिवीवर्माग्निर्वर्मसूर्योवर्ममेसंतुतिरश्चिकाः॥तदद्यवा
चःप्रथमंमसीयंयेनासुराउँअभिदेवाअसाम॥ऊर्जादउतयज्ञिया
सःपंचजनाममहोत्रंजुषध्वं॥इतिजपित्वाऽभिहिंकृत्य॥हिं३भूर्भुवः

ष

 ॥ स्वरेंप्रवोवाजाअभिद्यवोहविष्मंतोघृताच्यादेवान्जिगातिसुम्नयों३ म्प्र
प्रवोवाजाअभिद्यवोहविष्मंतोघृताच्या॥ देवान्जिगातिस्रुम्नयो३ म्प्र
 वोवाजाअभि॰च्या देवान्जिगातिस्रुम्नयो३ मग्नआयाहिवीतयेगृणा
नोहव्यदातये॥ निहोतासत्सिबर्हिषोर्३ न्तंत्वासमिद्भिरंगिरोघृतेनव
र्द्धयामसि॥ बृहच्छोचायविष्ट्यों३ सनःपृथुःश्रवाय्यमच्छादेवविवास
सि॥ बृहदग्नेस्रुवीर्यो३ मीकेन्यानमस्यास्तिरस्तमांसिदर्शतः॥ स
मग्निरिध्यतेवृषों३ वृषोअग्निःसमिध्यतेश्वोनदेववाहनः॥ तंह
विष्मंतईळतों३ वृषणंत्वावयंवृषन्वृषणःसमिधीमहि॥ अग्नेदी

द्यतंबृहो३ मग्निंदूतंवृणीमहेहोतारंविश्ववेदसं॥ अस्ययज्ञस्यसुक्रतों३
समिध्यमानोअध्वरेग्निःपावकईड्यः॥ शोचिष्केशस्तमीमहों३ सामि
द्धोअग्नआहुतदेवान्यक्षिस्वध्वर॥ त्वंहिहव्यवाळसो३ माजुहोताड्
वस्यताग्निंप्रयत्यध्वरेवृणीध्वंहव्यवाहनों३ माजुहोताडु॰ध्वरे॥ वृणी
ध्वंहव्यवाहनो३ माजुहोता॰ध्वरेवृणीध्वंहव्यवाहनो३ मग्नेमहां३ अ
सिब्राह्मणभारत॥ इतिनिगदेवसाययजमानस्यार्षेयान्प्रवृणीते॥
देवेद्धोमन्विद्धऋषिष्टुतोविप्रानुमदितःकविशस्तोब्रह्मसंशितोघृता
हवनःप्रणीर्यज्ञानांरथीरध्वराणामतूर्तोहोतातूर्णिर्हव्यवाट्॥ इत्य

वसाय॥आस्मात्वंजुहूर्देवानांचमसोदेवपानोरांइवाग्नेनेमिर्देवास्त्वं
परिभूरस्यावहदेवान्यजमानाय॥अग्निमग्नआ३वह॥सोममा३व
॥३॥ ह॥अग्निमा३वह॥उपांशुविष्णुंउच्चैःआ३वह॥अग्नीषोमावा३व
ह॥इंद्रंवैद्यमा३वह॥देवाँआज्यपाँ आ३वह॥अग्निंहोत्रायाव
हस्वंमहिमानमावह॥आवहजातवेदःसुयजायज॥दर्शेविष्णोरनं
तरं॥इंद्राग्नीआ३वह॥देवाँ आज्यपाइत्यादि॥यथास्थितमूर्ध्वजा
नुरुपविश्येयादग्वेदेर्व्युत्पत्तृणानिष्कूमोप्रादेशंकुर्यात॥अदितिर्मा ॥३॥
तास्यांतरिक्षान्माछेत्सीरिदमहमग्निनादेवेनदेवतयात्रिवृतास्तो

मेनरथंतरेणसाम्नागायत्रेणछंदसाग्निष्टोमेनयज्ञेनवषट्कारेणवज्रे
णयोस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मि॥आश्रावयिष्यंतमध्वर्युमनुमं
त्रयेत॥आश्रावययज्ञंदेवेष्वाश्रावयमांमनुष्येषुकीर्त्यैयत्रासिब्रह्मव
र्चसायेतिप्रत्यृणानं॥देवसवितरेतंत्वावृणतेग्निंहोत्रायसहपित्रावैश्वा
बी नरेणद्यावापृथिवीमांपातामग्निर्होताहंमा३नुषः॥मानुषइत्यध्वर्योः
श्रुत्वा॥उदायुषास्वायुषोदोषधीनांरसेनोत्पर्जन्यस्यधामभिरुदस्था
ममृताँअनु॥उत्तिष्ठेत्॥षष्ठिश्वाध्वर्योनवतिश्चपात्रा॥अग्निंहोतार
मंतराविभ्रत्ता॥सिनंतिपाकमतिधीरएतीत्युत्थायजपेत॥अस्तस्य

पंथामन्वेमिहोता॥ अभिक्रम्यांसेध्वर्युमन्वारभेत पार्श्वस्थेन पाणि
नाग्नीध्रमेकदेशेनसव्येनवा॥ इंद्रमन्वारभामहेहोतृवूर्येपुरोहितं॥ ये
॥४॥ नायंनुत्तमंस्वर्देवा अंगिरसोदिवं॥ संमार्गंतृणेस्त्रिरभ्यात्मंमुखंसंमृ
जीत॥ संमार्गोसिसंमांप्रजयापशुभिर्मृद्धि॥ सकृन्मंत्रेणाद्भिस्तूष्णीं
स्पृष्ट्वोदकं॥ दक्षिणातृद्धोतृषदनस्यांतरेणगत्वासव्यांसेनावृत्यहो
तृषदनस्य पश्चात्प्राङ्मुखोभूत्वाहोतृषदनमभिमंत्रयेत॥ अहेदैधि
षव्योदतस्तिष्ठान्यस्यसदनेसीदयोस्मत्पाकतरः॥ अंगुष्ठोपकनि ॥४॥
ष्ठिकाभ्यांहोतृषदनात्तृणंप्रत्यक्दक्षिणानिरसेन्निरस्तःपराव

सुः॥ अपउपस्पृश्य॥ इदमहमर्वावसोःसदनेसीदामीत्युपविशेद्दक्षि
णोत्तरिणोपस्थेन॥ देवबर्हिःस्वासस्थं त्वाध्यासदेयं॥ अभिहिंषहोतः
प्रतरांबर्हिषद्भव॥ जानुत्रिरसाबर्हिरुपस्पृश्यातऊर्ध्वंजपेत॥ भूपत
येनमोभुवनपतयेनमोभूतानांपतयेनमोभूतयेनमः प्राणंप्रपद्येपा
नंप्रपद्येव्यानंप्रपद्येवाचंप्रपद्येचक्षुःप्रपद्येश्रोत्रंप्रपद्येमनःप्रपद्येऽ
आत्मानंप्रपद्येगायत्रीं प्रपद्येत्रिष्टुभंप्रपद्येजगतींप्रपद्येनुष्टुभंप्रप
द्येछंदांसिप्रपद्ये॥ सूर्योनोदिवस्पातुवातोअंतरिक्षात्॥ अग्निर्नः
पार्थिवेभ्यः॥ नमोमहद्भ्योनमोअर्भकेभ्योनमोयुवभ्योनमआशि

नेभ्यः॥ यजामदेवान्यद्धिराजक्रवाममाज्यायसन्नासमावृक्षिदेवाः॥ विश्वे
दर्श॰ हो॰ ॥ देवाः शास्तनमायथेहहोतावृतोमनवैयंनिषद्य॥ प्रमेब्रूतभागधेयंय
थावोयेनपथाहव्यमावोवहानि॥ अराधिहोतानिषदायजीयानभि
॥ ५ ॥ प्रयांसिस्कधित्तानिहिरवत॥ यजामहेयज्ञियान्हंतदेवाँ॥ ईळामहा
ईड्याँ॥ आज्येन॥ तदद्यवाचःप्रथमंमसीयेयेनासुराँ॥ अभिदेवा
असाम॥ ऊर्जादउतयज्ञियासःपंचजनाममहोत्रंजुषध्वं॥ प्रदीप्त
इध्मेस्रुचावादापयेन्तिगदेन॥ अग्निर्होतावेत्त्वग्नेर्होत्रंवेत्तुप्रावित्रं ॥ ५ ॥
साधुंतयजमानदेवतायोअग्निं॥ होतारमवृथाः॥ इतिजपेत्॥ घृत

वतीमध्वर्योः स्रुचमास्यस्वदेवयुवंविश्ववारेईळामहेदेवाँईळेन्यांनमस्या
मनमस्याम्यजामयज्ञियान्॥ ये ३ यजामहेसमिधः समिधोअग्नआज्य
स्यव्यंतु ३ वौ ३ षट्॥ वागोजःसहओजोमयिप्राणापानौ॥ वषट्कारमु
क्तोक्तानुमंत्रयंते॥ ये ३ यजामहेतनूनपादग्नआज्यस्यवेतु ३ वौ ३
षट्॥ वागो॰॥ वसिष्ठशुनकात्रिवध्र्यश्वराजन्यानामयंद्वितीयः॥ ये ३
यजामहेनराशंसोअग्नआज्यस्यवेतु ३ वौ ३ षट्॥ वागो॰॥ ये ३ य
जामहइळोअग्नआज्यस्यव्यंतु ३ वौ ३ षट्॥ वागो॰॥ ये ३ यजामहे
बर्हिरग्नआज्यस्यवेतु ३ वौ ३ षट्॥ वागो॰॥ ये ३ यजामहेस्वाहाग्निं

स्वाहासोमंस्वाहाग्निंस्वाहाउपांशुंविष्णुंउच्चैःस्वाहाग्नीषोमौस्वाहेंद्रंवै
मृधंस्वाहादेवाआज्यपाजुषाणाअग्नआज्यस्यव्यंतु३वौ३षट्॥दर्शे
॥ ६ ॥ विष्णोरनंतरं॥स्वाहेंद्राग्नीस्वाहादेवाआज्यपाइत्यादि॥वार्त्रघ्नावा
ज्यभागौ॥अग्निर्वृत्राणिजंघनद्द्रविणस्युर्विपन्यया॥समिद्धःशुक्र
आहुतां३॥ये३यजामहेग्निंजुषाणो॥अग्निराज्यस्यवेतु३वौ३षट्॥
त्वंसोमासिसत्पतिस्त्वंराजोतवृत्रहा॥त्वंभद्रोअसिक्रतों३॥ये३य
जामहेसोमंजुषाणःसोमआज्यस्यहविषोवेतु३वौ३षट्॥वागो॰॥ ॥ ६ ॥
इतिपौर्णमास्यां॥दर्शे॥वृधन्वंतावाज्यभागौ॥अग्निःप्रत्नेनम

न्मनाशुंभानस्तन्वंस्वां॥कविर्विप्रेणवावृधों३॥ये३यजामहेग्निंजुषाणो॰
वेतु३वौ३षट्॥वागो॰॥सोमगीर्भिष्ट्वावयंवर्द्धयामोवचोविदः॥सुमृळी
कोनआविशां३॥ये३यजामहेसोमंजुषाणः॰हविषोवेतु३वौ३षट्॥
वागो॰॥अथप्रधानस्य॥वेत्थाहिवेधोअध्वनःपथश्चदेवांजसा॥अ
ग्नेयज्ञेषुसुक्रतों३॥उच्चैः॥ओं३॥ये३यजामहेउपांशुंअग्निंपथिकृ
तंआदेवानामपिपंथामगन्मयच्छक्नवामतदनुप्रवोळ्हुं॥अग्निर्वि
द्वान्त्सयजात्सेदुहोतासोअध्वरान्त्सऋतून्कल्पयाती३उच्चैःवौ३
षट्॥वागो॰॥ ॥अग्निर्मूर्द्धादिवःककुत्पतिःपृथिव्याअयं॥अपांरे

तांसिजिन्वतों ३॥ ये ३ यजामहेग्निंसुवोयद्वस्यरजसश्चनेतायत्रानियु
द्भिः सचसेशिवाभिः॥ दिविमूर्द्धानंदधिषेस्वर्षांजिह्वामग्नेचकृषेहव्य

वाहँ ३ वौ ३ षट्॥ वागो॰॥ विष्णुरुपांशुं॥ इदंविष्णुर्विचक्रमेत्रेधानि
दधेपदं॥ समूळ्हमस्यपांसुरे॥ उच्चैः ॐ ३॥ ये ३ यजामहे उपांशुविष्णुं
त्रिर्देवः पृथिवीमेष एतांविचक्रमे शतर्चसंमहित्वा॥ प्रविष्णुरस्तुतव
सस्तवीयान्त्वेषंह्यस्यस्थविरस्यनामा ३ उच्चैः वौ ३ षट्॥ वागो॰॥ अ
ग्नीषोमासवेदसासहूतीवनतंगिरः॥ संदेवत्राबभूवथोः ३॥ ये ३ यजा
महेग्नीषोमौयुवमेतानिदिविरोचनान्यग्निश्चसोमसक्रतूअधत्तं॥

युवंसिंधूँरभिशस्तेरवद्यादग्नीषोमावमुंचतंगृभीता ३ न्वौ ३ षट्॥ वा
गो॰॥ विनइंद्रमृधोजहिनीचायच्छपृतन्यतः॥ योअस्माँ अभिदासत्य
धरंगमयातमों ३॥ ये ३ यजामहइंद्रंवेमृधंमृगोनभीमः कुचरोगिरि
ष्ठाः परावतआजगंथापरस्याः॥ सृकंसंशायपविमिंद्रतिग्मंविशत्रू
न्ताळ्हिविमृधोनुदस्व ३ वौ ३ षट्॥ वागो॰॥ दर्शेविष्णोरनंतरं॥
इंद्राग्नीअवसागतमस्मभ्यंचर्षणीसहा॥ मानोदुःशंसईशतों ३॥
ये ३ यजामहइंद्राग्नीगीर्भिर्विप्रः प्रमतिमिच्छमानईट्टेरयिंयशसं
पूर्वभाजं॥ इंद्राग्नीवृत्रहणासुवज्राप्रनोनव्येभिस्तिरतंदेष्णैः ३ वौ ३

दर्श०हो०॥ षट्॥ वागो०॥ अथसंनयतः॥ ऐंद्रसानसिंरयिंसजित्वानंसदासहं॥
वर्षिष्ठमूतयेभरं ३॥ येय३जामहइंद्रंप्रससाहिषेपुरुहूतशत्रून्ज्ये
॥८॥ ष्ठस्तेशुष्मइहरातिरस्तु॥ इंद्राभरदक्षिणेनावसूनिपतिः सिंधूनाम
सिरेवतीनां३वौ३षट्॥ वागो०॥ महेंद्रस्य॥ महाँ इंद्रोयओजसा
पर्जन्योवृष्टिमाँ इव॥ स्तोमैर्वत्सस्यवावृधे ३॥ येय३जामहेमहें
द्रंभुवस्त्वमिंद्रब्रह्मणामहान्भुवोविश्वेषुसवनेषुयज्ञियः॥ भुवोनॄं
श्च्यौत्नोविश्वस्मिन्भरेज्येष्ठश्चमंत्रोविश्वचर्षणा३वौ३षट्॥ वा ॥८॥
गो०॥ अथस्विष्टकृतादि॥ पिप्रीहिदेवाँ उशतोयविष्ठविद्वाँ ऋ

तूँऋतुपतेयजेह॥ येदैव्याऋत्विजस्तेभिरग्नेत्वंहोतॄणामस्याय
जिष्ठो ३॥ येय३जामहेग्निंस्विष्टकृतमयाळग्निरग्नेः प्रियाधामा
न्ययाट्सोमस्यप्रियाधामान्ययाळग्नेः प्रियाधामान्ययाडुपां
शुविष्णोः [illegible]ः प्रियाधामान्ययाळग्नीषोमयोः प्रियाधामान्य
याळिंद्रस्यवैमृधस्यप्रियाधामान्ययाट्देवानामाज्यपानांप्रिया
धामानि॥ यक्षदग्नेर्होतुःप्रियाधामानियक्षत्स्वंमहिमानंयजतामे नमा
ज्याइषःकृणोतुसोअध्वराजातवेदाजुषतांहविरग्नेयदद्यविप्रोऽ
अध्वरस्यहोतः पावकशोचेवेष्ट्वंहियज्वा॥ ऋतायजासिमहिना

 वियद्रहे व्यावहयाविछयातेअद्या३वौ३षट् ॥ वागो॰ ॥ दर्शेविष्णोरनं
तरं ॥ त्वयाकिंद्राग्न्याः प्रियाधामान्ययाट्देवानामाज्यपानांप्रियाधा
 मानियक्षदग्नेहोे॰ ॥ इत्यादि ॥ प्रदेशिन्याः पर्वणि उत्तमे अंजयित्वो
ष्ठयोरस्यात्मनिमार्ष्टि ॥ वाचस्पतिनातेहुतस्येषेप्राणायप्राश्नामि
॥ मनसस्पतिनातेहुतस्योर्जेपानायप्राश्नामि ॥ उत्तरमुत्तरेअध
रमधरेस्पृष्टोदकं ॥ अंजलिनेळांप्रतिगृह्य सव्येपाणौकृत्वाप
श्वादस्याउदगंगुलिंपाणिमुपधायावांतरेळामवदापयीतांतरेणां
गुष्ठमंगुलीश्वस्वयंद्वितीयमाददीतप्रत्यालभ्यामंगुष्ठेनाभिसं

गृह्य प्रत्याहृत्यांगुलीरमुष्टिंकृत्वादक्षिणतइळांपरिगृह्यास्यसंमि
तामुपह्वयतेप्राणसंमितांवा ॥ इळोपहूता सहदिवाबृहतादित्येनो
पास्मांइळाह्वयतांसहदिवाबृहतादित्येनेळोपहूतासहांतरिक्षेण
वामदेव्येनवायुनोपास्मांइळाह्वयतांसहांतरिक्षेणवामदेव्येनवायु
नेळोपहूतासहपृथिव्यारथंतरेणाग्निनोपास्मांइळाह्वयतांस
हपृथिव्यारथंतरेणाग्निना ॥ उपहूतागावः सहाशिरउपमांगावः
सहाशिराह्वयंतामुपहूताधेनुः सहऋषभोपमांधेनुः सहऋषभा
ह्वयतामुपहूतागौर्घृतपद्युपमांगौर्घृतपदीह्वयतामुपहूतादिव्याः

दर्श०हो ॥ सप्तहोतारउपमांदिव्याःसप्तहोतारोह्वयंतामुपहूतःसखाभक्षउप
मांसखाभक्षोह्वयतामुपहूतेकाष्ठिरुपमामिळाष्टिर्ह्वयतां॥इ
॥१०॥ त्युपांश्वथोच्चैः॥इळोपहूतोपहूतेळोपास्मांइळाह्वयतामिळोप
हूता॥मानवीघृतपदीमैत्रावरुणीब्रह्मदेवकृतमुपहूतंदैव्याअ
ध्वर्यवउपहूताउपहूतामनुष्याः॥यइमंयज्ञमवान्येचयज्ञपतिं
वर्द्धानुपहूतेद्यावापृथिवीपूर्वजेऋतावरीदेवीदेवपुत्रे॥उपहूतो
यंयजमानउत्तरस्यांदेवयज्यायामुपहूतोभूयसिहविष्करणइ ॥१०॥
दंमेदेवाहविर्जुषंतामितितस्मिन्नुपहूतः॥इत्युपहूतायावांत

रेळांप्राश्नीयात्॥इळेभागंजुषस्वनःपिन्वगाजिन्वार्वतोरायस्पोषस्यत्वि
षेतस्यनोरास्वतस्यनोदास्तस्यास्तेभागत्रीमहि॥सर्वात्मानःसर्वतनवः
सर्ववीराःसर्वपूरुषाःसर्वपुरुषाइनिवा॥अवांतरेळांप्राश्याचमिवाव
॥मार्जयित्वानुयाजेश्चरंति॥परिस्तरणेरंजलिमंतर्धायापआसेचय
तेतन्मार्जनं॥अन्वाहार्यंस्वंभागंप्रतिगृह्णाति॥कइदंकस्माअदा
त्कामःकामायादात्कामोदाताकामःप्रतिग्रहीताकामंसमुद्रमाविश
कामेनत्वाप्रतिगृह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुपृथिवीप्र
तिगृह्णातु॥अथानुयाजाः॥देवंबर्हिर्वसुवनेवसुधेयस्यवेतु३

द॰ हो॥ वौ ३ षट्॥ वागो॰॥ देवो नराशंसो वस्रुवने वस्रुधे यस्य वेतू३ वौ३ षट्॥ वागो॰
॥ देवो अग्निः स्विष्टकृत्सुद्रविणा मंद्रः कविः सत्यमन्माऽयजी होता होतुर्हो
॥११॥ तुरायजीयानग्ने यान्देवानयाळ्याँ अपिप्रेर्ये ते होत्रे अमत्सत तांससनुषीं
होत्रान्देवंगमान्दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होताऽभूर्वस्रुवने
वस्रुधेयस्य नमोवाके वीही३ वौ३ षट्॥ वागो॰॥ सूक्तवाकाय संप्रेषितः
॥ इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमुत नमोवाकमृध्यास्म सू
क्तोच्यमग्ने त्वं सूक्तवागसि॥ उपश्रुती दिवस्पृथिव्योरोमन्वती तेऽस्मि ॥११॥
न्यज्ञे यजमान द्यावापृथिवी स्तां॥ शंगयी जीरदानू अत्रस्नू अप्रवेदे

उरुगव्यूती अभयंकृतौ॥ वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवा ऊर्जस्वती पयस्वती
सूपचरणा च स्वधिचरणा च तयोराविदीत्यवसाय॥ अग्निरिदं हविरजुषतावी
वृधत महो ज्यायोऽकृत॥ सोम इदं हविर॰॥ अग्निरिदं हविरजुषतावीवृध॰॥ उपां
शु विष्णुः उच्चैः इदं हविरजुषतावीवृध॰ कृत॥ अग्नीषोमाविदं हविरजुषेता
मवीवृधेतां महो ज्यायोऽक्राताम्॥ इंद्रो वैमृध इदं हविरजुषेतावी॰ कृत॥ देवा आ
ज्यपा आज्यमजुषंतावीवृधंत महो ज्यायोऽक्रत॥ अग्निर्होत्रेणेदं हविरजु
षतावीवृ॰ कृत॥ दर्शे विष्णोरनंतरं॥ इंद्राग्नी इदं हविरजुषेतामवीवृधेतां
महो ज्यायोऽक्राताम्॥ देवा आज्यपा इत्यादि॥ अस्यामृधेद्धोत्रायां देवंगमा

दर्श०हो०॥ यामाशास्ते यंयजमानः॥ यजमानो नक्षत्रनाम्ना॥ आयुराशास्ते सुप्रजास्त्वमा
शास्ते रायस्पोषमाशास्ते सजातवनस्यामाशास्त उत्तरांदेवयज्यामाशास्ते
॥१२॥ भूयोहविष्करणमाशास्ते दिव्यंधामाशास्ते विश्वंप्रियमाशास्ते यदनेन हविषा
शास्ते तदस्यात्तदृध्यात्तदस्मै देवारासंतांतदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मा
नुषाः॥ इष्टंच वित्तंचोभेचनो द्यावापृथिवी अंहसस्पातामिह गतिर्वामस्येदं
नमो देवेभ्यः॥ शंयुवाकाय संप्रेषितः॥ तच्छंयोरावृणीमहे गातुंयज्ञाय गा
तुंयज्ञपतये दैवीस्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वंजिगातु भेषजं शं
नो अस्तु द्विपदे शंचतुष्पदे॥ वेदमस्मै प्रयच्छत्यध्वर्युस्तंगृह्णीयात्॥ वेदो ॥१२॥
सि वेदो विदेय॥ उदायुषा स्वायुषोदोषधीनांरसेनोत्पर्जन्यस्य धामभिरु

दस्थाममृतां अनु॥ एतोनो पोस्थाय पश्चाद्गार्हपत्यस्योपविश्य पत्नीसंयाजैश्च
रंति॥ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं॥ भवा वाजस्य संगथों३॥ ये३
यजामहे सोमंसंते पयांसि समु यंतु वाजाः संवृष्ण्यान्यभिमातिषाहः॥ आप्या
यमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिषा३ वौ३ षट्॥ वागो०॥ इ
हत्वष्टारमग्रियं विश्वरूपमुपह्वये॥ अस्माकमस्तु केवलों३॥ ये३ यजा
महे त्वष्टारंतन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणस्यस्व॥ यतो वीरः
कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामा३ वौ३ षट्॥ वागो०॥ देवानां
पत्नीरुशतीरवंतु नः प्रावंतु नस्तुजये वाजसातये॥ याः पार्थिवासो या अ

दर्श० हो०॥ पामपित्रंतेतानोदेवीः स्रुहवाः शर्मयच्छतों ३॥ ये ३ यजामहे देवानांपत्नीरुत
ग्नाव्यंतुदेवपत्नीरिंद्राण्यग्नाय्यश्विनीराट्॥ आरोदसीवरुणानीशृणो
॥१३॥ तुव्यंतुदेवीर्यऋतुर्जनीनां ३ वौ ३ षट्॥ वागो०॥ अथप्रजाकामाच्चेत्स्त्री
ग्गृहपतेर्यजेत॥ राकामहं स्रुहवांस्रुष्टुतीहुवेशृणोतुनः स्रुभगाबोध
तुत्मना॥ सीव्यत्वपः सूच्याछिद्यमानयाददातुवीरंशतदायमुक्थ्यों ३
॥ ये ३ यजामहे राकां यास्तेराकेस्रुमतयः स्रुपेशसोयाभिर्ददासिदा
शुषेवसूनि॥ ताभिर्नोअद्यस्रुमनाउपागहिसहस्रपोषंस्रुभगेरर
रा ३ वौ ३ षट्॥ वागो०॥ सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा॥ ॥१३॥

दे

जुषस्वहव्यमाहुतंप्रजांदेविदिदिड्ढिनों ३॥ ये ३ यजामहेसिनीवालींयास्रुबा
हुः स्वंगुरिः स्रुषूमाबहुसूवरी॥ तस्यैविश्पत्न्यैहविः सिनीवाल्यैजुहोतना ३
वौ ३ षट्॥ वागो०॥ कुहूमहंस्रुकृतंविद्मनापसमस्मिन्यज्ञेस्रुहवांजोहवी
मि॥ सानोददातुश्रवणंपितॄणांतस्यैतेदेविहविषाविधेमों ३॥ ये ३ यजामहे
कुहूंकुहूर्देवानाममृतस्यपत्नीहव्यानोअस्यहविषःशृणोतु॥ संदाशुषे
किरतुभूरिवामंरायस्पोषंयजमानेदधातु ३ वौ ३ षट्॥ वागो०॥ अनुनो
द्यानुमतिर्यज्ञंदेवेषुमन्यतां॥ अग्निश्चहव्यवाहनोभवतंदाशुषेमयों ३
॥ ये ३ यजामहेनुमतिमन्विदनुमतेत्वंमन्यासैशंचनस्कृधि॥ क्रत्वेय

दर्श०हो०॥ क्षायनोहितुप्रणआयूंषितारिषा३द्वौ३षट्॥ वागो०॥ अग्निर्होताग
हपतिःसराजाविश्वावेदजनिमाजातवेदाः॥ देवानामुतयोमर्त्यानांय
॥३४॥ जिष्ठःसप्रयजतामृतावों३॥ ये३यजामहेग्निंगृहपतिंहव्यवाळग्नि
रजरःपितानोविभुर्विभावास्वदृशीकोअस्मे॥ स्वगार्हपत्याःसमिषो
दिदीह्यस्मद्र्यक्संमिमीहिश्रवांसी३वौ३षट्॥ वागोजःसहओजो
मयिप्राणापानौ॥ अंगुलिपर्वंजिनादिपूर्ववत्॥ आज्यंपाणितले
वद्दापयीतेळामुपह्वयसर्वंप्राश्नीयाच्छंयुवाकोक्षवेन्नवा॥ वेदंप ॥३४॥
त्न्यैप्रदायवाचयेद्धोताध्वर्युर्वा॥ वेदोसिवित्तिरसिविदेयकर्मासि

करणमसिक्रियासंसनिरसिसनितासिसनेयंघृतवंतंकुलायिनंरायस्पोषंस
हस्रिणंवेदोददातुवाजिनं॥ यंबहवउपजीवंतियोजनानामसद्दृशी॥ तंविदे
यप्रजांविदेयकामायत्वा॥ वेदद्विरसानाभिदेशमालभेतप्रजाकामश्चेत्
॥ अथास्यायोक्त्रंविचृतेत्॥ प्रत्वामुंचामिवरुणस्यपाशाद्येनत्वाबध्नात्स
वितास्वशेवः॥ ऋतस्ययोनौसुकृतस्यलोकेरिष्टांत्वासहपत्यादधामि
॥ तत्प्रत्यग्गार्हपत्याद्द्विगुणंप्राक्पात्रांनिधायोपरिष्टाद्दर्स्यादग्राणि
वेदतृणानिकरोतिपुरस्तात्पूर्णपात्रंसंश्लिष्टंवेदतृणैरभिमंत्र्यवाचयेत्
॥ पूर्णमसिपूर्णंमेभूयाःसुपूर्णमसिसुपूर्णंमेभूयाःसदसिसन्मेभूयाः

 सर्वमसि सर्वं मे भूयाः अक्षितिरसि मा मे क्षेष्ठाः ॥ इति जपित्वा ॥ अथैनां पूर्णपा
त्रात्प्रतिदिशमुदकमुदुक्षन्नुदुक्षंती वाचयति ॥ प्राच्यां दिशि देवा ऋत्विजो
॥३५॥ मार्जयंतां ॥ दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां ॥ प्रतीच्यां दिशि गृ
हाः पशवो मार्जयंतां ॥ उदीच्यां दिश्याप ओषधयो वनस्पतयो मार्जयंतां
॥ ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयतां ॥ मार्जयंतामिति वा ॥
अथास्या उत्तानमंजलिमधस्ताद्यो क्रस्य निधायात्मनश्चवसव्यं पूर्णपा
त्रं निनयन्वाचयेत् ॥ माहं प्रजां परासिचं या नः सयावरी स्थन ॥ समुद्रे वो ॥३५॥
निनयानि स्वं पाथो अपीथ ॥ वेदतृणान्यग्रे गृहीत्वा विधून्वन्त्संततं स्तृण

न्त्सव्येन गार्हपत्यादाहवनीयमेति ॥ तंतुं तन्वन्रजसो भानुमन्विहि ज्यो
तिष्मतः पथो रक्ष धिया कृतान् ॥ अनुल्बणं वयत जोगुवामपो मनुर्भव जनं
या दैव्यं जनं ॥ मंत्रांते स्तरणारंभः ॥ प्रत्यगुदगाहवनीयादवस्थाय स्था
ल्याः स्रुवेणादाय सर्वप्रायश्चित्तानि जुहुयात् ॥ अयाश्चाग्ने॰ ॥ अतो
देवा॰ ॥ इदं विष्णुर्विचक्रमे॰ ॥ भूः स्वाहा ॥ भुवः स्वाहा ॥ स्वः स्वाहा ॥
स्वः भूर्भुवः स्वाहा ॥ संस्थाजपेनोपतिष्ठंते ॥ ओं च मे स्वरश्च मे यज्ञोपचते
नमश्च ॥ यत्ते न्यूनं तस्मै त उप यत्तेतिरिक्तं तस्मै ते नमः ॥ ॥ इति दर्श
पौर्णमासहोत्रप्रयोगः समाप्तः ॥ ॥ संवत् १८९८ शके १७६३ ॥

हर्सी०हो०॥ परिधाविनामसंवत्सरेउत्तरायणेआषाढशुद्धअष्टम्यांतद्दिनीदंपुस्तकं
समाप्तं॥फणसरकरइत्युपनामकरामचंद्रभट्टात्मजमहादेवेनस्वहस्ता
॥१६॥ क्षरंलिखितं॥यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया॥यदिशुद्धमशु
द्धंवाममदोषोनविद्यते॥१॥विसर्गबिंदुमात्राणिपदपादाक्षराणिच
॥न्यूनातिचातिरिक्तानिक्षमस्वपरमेश्वर॥२॥तैलाद्रक्षेजलाद्रक्षे
द्रक्षेच्छिथिलबंधनात्॥मूर्खहस्तेनदातव्यमेवंवदतिपुस्तकं॥३॥छ॥ ॥१६॥

॥ ॥ इती दर्शपोर्णमासहोत्रसमाप्तः ॥ पत्रें १६ ॥ ॥